क्रमकथनम् ४अ० १आ० गतार्थाः । देहात्मबुद्धेर्दोषजन्यतया दोषस्य च मिथ्याज्ञानाधीनत्वेन तत्त्वज्ञानात् आत्मनोदेहादिभ्यो भेदज्ञाननिवृत्तौ तदभेदज्ञाननिरासेन मिथ्याज्ञाननिवृत्तिः तस्यां च सत्यां क्रमेण प्रवृत्तिनिवृत्त्या दुःखनिवृत्तिरूपापवर्गसिद्धिः अतोऽपवर्गसाधनं तत्त्वज्ञानमित्येवं प्रतिपादनम् । साधुतया भावितानां रूपादिविषयाणां दोषहेतुत्वकथनम् । सौन्दर्यं पश्यतो रागादिर्ब्रह्मणोऽप्यसुकरपरिहार इत्याशङ्क्य तत्र सौन्दर्य्यबुद्धे रागाधीनतया तरुण्यादिदेहे सौन्दर्य्याभिमानस्य त्याज्यताकथनम्। भाष्ये तु "परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीया" इत्युक्तम् । तथा च "खेलत्खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी । कमलकुलस्तनीयम् पूर्णेन्दुमुखी सुखाय मे भवितेति" अनुरञ्जनसंज्ञा । "चर्म्मनिर्म्मितपात्रीयं मांसासृक्पूयपूरिता । अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः" अशुभसंज्ञा एवं स्वदेहादावपि चिन्तनम् । परमाणुपुञ्जस्यैव घटादिरूपताऽतोनास्ति अतिरिक्तोऽवयवीति सौत्रान्तिकवैभाषिकयोर्मतस्य पूर्व्वदूषितस्यापि स्वमतदार्ढ्याय पुनर्दूषणम् । परमाणोस्त्रुटिपरत्वव्यवस्थापनम् । आकाशस्य सर्व्वगतत्वं सर्वमूर्त्तसंयोगित्वं तत्र संयोगस्याव्याप्यवृत्तितया तदवच्छेदकभेदं विनाऽनुपपत्त्या सावयवत्वापत्तिमाशङ्क्य मूर्त्तपदार्थस्यैवावयवानां तदवच्छेदकत्वम् इत्युक्त्या तस्य निरवयवत्वसमर्थनम् । सर्व्वत्र शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् आकाशस्य सर्व्वमूर्त्तसंयोगित्वसमर्थनम् आकाशे च प्रतिहतस्य परावर्त्तनरूपव्यूहस्य उत्तरदेशगतिप्रतिबन्धरूपविष्टम्भस्याभावात् विभुत्वव्यवस्थापनम् । परमाणोः संयोगवत्त्वान्यथानुपपत्त्या सावयवत्वापत्तिः संयोगस्य अव्याप्यवृत्तितया अव्याप्यवृत्तेस्सावच्छेदकभेदं विना सत्त्वासम्भवादित्याशङ्क्य तदवयवानामपि संयोगसिद्धये सावयवत्व कल्पनायामनवस्थापत्तिरतो दिग्विभागानामेव संयोगावच्छेदकत्वकल्पनेन परमाणोर्निरवयवत्वसमर्थनम् । ज्ञानातिरिक्तोबाह्यपदार्थो नास्तीत्यत्र यदि प्रमाणमस्ति तदा ज्ञानातिरिक्तप्रमाणरूपबाह्यस्य सत्त्वान्न बाह्याभावः अथ तत्र प्रमाणं नास्ति तदा निष्प्रमाणकत्वान्न तत्सिद्धिरित्येवं रूपेण बाह्यार्थाभावाङ्गीकर्त्तृमतनिराकरणम् । स्वप्नस्य स्मृतिविशेषरूपत्वं व्यवस्थाप्य शुक्तिरजतविज्ञाने रजतांशस्य ज्ञानलक्षणया उपनीतस्य संसर्गमात्र बोध इति व्यवस्थापनेन स्वप्नदृष्टान्तेन ज्ञानमात्रस्यासद्विषयकत्ववादिमतनिराकरणम् । इत्येवं बाह्यार्थभङ्गनिराकरणम् । ज्ञानसामान्यात् तत्त्वज्ञानस्यापि क्षणिकत्वात् तन्नाशे प्रतिबन्धकापाये पूर्व्ववासनावशात् मिथ्याज्ञानं पुनरुत्पद्येतेति तत्त्वज्ञानस्य न मिथ्याज्ञानोच्छेदकतेत्याशङ्कायां तन्निरासः । समाधिविशेषाभ्यासात् तत्त्वज्ञानस्य विवृद्धिः । तद्वृद्ध्या च मिथ्याज्ञानवासनातिरोभावान्न तत् फलायालमिति समर्थनम् । ततश्च तत्त्वज्ञानसंस्कारः अन्यसंस्कारप्रतिबन्धी भवतीति व्यवस्थापनम् । तत्र प्रतिबन्धस्य कार्य्याक्षमत्वसम्पादनं विनाशोवेति । स्वाभाविकविषयरागादिना प्रतिबन्धात् समाध्यसम्भवमाशङ्क्य पूर्व्वकृतेश्वराधनादिना अभ्यासपाटवे जनिते तत्संस्कारात् समाधिसिद्धिरिति समर्थनम् । तथा च पूर्व्वकृतेश्वरानुसन्धानादिसहकारेणैव तत्त्वज्ञाने जननीये न रागादेः प्रतिबन्धकत्वम् । अरण्यगुहापुलिनादिषु योगाभ्यासस्थानत्वकथनम् । अपवर्गे प्रारब्धकर्म्मानुसारेण देहादेः सत्त्वेन तदनुरूपार्थावभाससद्भावकथनम् । प्रारब्धकर्म्मावसाने देहाभावे विदेहकैवल्यप्राप्तिकथनम् । समाधिसिद्धये यमनियमाद्यष्टाङ्गयोगाभ्यासस्यावश्यकतोक्तिः । श्रवणमनननिदिध्यासनैरात्मसाक्षात्कारोत्पत्तिकथनम् । एतच्छास्त्राभिज्ञैः सह स्वनिश्चितार्थदार्ढ्याय एतच्छास्त्रोदितार्थनिश्चयस्य संवादः कर्त्तव्य इति प्रतिपादनम् । संवादश्च शिष्यगुरुसब्रह्मचारिश्रेयोर्थिभिः जिगीषाहीनैः सह कार्य्य इति निरूपणम् । तत्त्वनिर्णयार्थं प्रतिकूलपक्षहीनतया संवादः करणीयः न जिगीषयेति निरूपणम् । तत्त्वनिश्चयसंरक्षणार्थं वीजप्ररोहसंरक्षार्थं कण्टकावरणवत् त्रयीबाह्यैः सह जल्पवितण्डे आश्रयणीये न वाद इत्येतत्कथनम् तथा च यदि त्रयीबाह्यैः स्वपक्ष आक्षिप्यते तदा जल्पवितण्डाभ्यां तेषां मतं खण्डनीयम् । एते अर्थाः ४अ० २आ० उक्ताः ।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्तप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्धिनित्यानित्यकार्य्यसमाश्चतुर्विंशतिं जातीर्विभज्य तल्लक्षणान्युक्तानि । कथाभासप्रकरणम् । ५अ० १आ० गतार्थाः । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरम् निरर्थकमविज्ञातार्थमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपोमतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्च निग्रह-